योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः १११

एकादशाधिकशततमः सर्गः १११

श्रीवसिष्ठ उवाच ।

एतत्ते सर्वमाख्यातं शिखिध्वजकथानकम् ।

अनेन गच्छन्मार्गेण न कदाचन खिद्यसे ।। १

एतां दृष्टिमवष्टभ्य रागद्वेषविनाशिनीम् ।

नित्यं नीरागया बुद्ध्या तिष्ठावष्टब्धतत्पदः ।। २

यथा शिखिध्वजो राज्यं कृतवानेवमीदृशम् ।

राम व्यवहरन्राज्ये भोगमोक्षमयो भव ।। ३

शिखिध्वजक्रमेणैव यथा बोधमवाप्तवान् ।

कचो बृहस्पतेः पुत्रस्तथा बुध्यस्व राघव ।। ४

श्रीराम उवाच ।

बृहस्पतेर्भगवतः पुत्रोऽसौ भगवान्कचः ।

यथा प्रबुद्धो भगवन्समासेन तथा वद ।। ५

श्रीवसिष्ठ उवाच ।

श्रृणु राजन्कथां श्रीमाञ्छिखिध्वजवदेव सः ।

प्रबोधं परमं यातो देवदेशिकजः कचः ।। ६

बालभावात्समुत्तीर्णः संसारोत्तरणोन्मुखः ।

कचः पदपदार्थज्ञो बृहस्पतिमभाषत ।। ७

कच उवाच ।

भगवन्सर्वधर्मज्ञ कथं संसृतिपञ्जरात् ।

अस्मान्निर्गम्यते ब्रूहि जन्तुना जीवतन्तुना ।। ८

बृहस्पतिरुवाच ।

अनर्थमकरागारादस्मात्संसारसागरात् ।

उड्डीयते निरुद्वेगं सर्वत्यागेन पुत्रक ।। ९

श्रीवसिष्ठ उवाच ।

इत्याकर्ण्य कचो वाक्यं पितुः परमपावनम् ।

सर्वमेव परित्यज्य जगामैकान्तकाननम् ।। १०

बृहस्पतेस्तद्गमनं नोद्वेगाय बभूव ह ।

संयोगे च वियोगे च महान्तो हि महाशयाः ।। ११

अथ वर्षेषु जातेषु त्रिषु पञ्चसु सोऽनघ ।

पुनः प्राप महारण्ये कस्मिंश्चित्पितरं कचः ।। १२

परिपूज्याभिवाद्यैनं समालिङ्गितपुत्रकम् ।

अपृच्छद्वाक्पतिं भूयः स कचः कान्तया गिरा ।। १३

कच उवाच ।

अद्येदमष्टमं वर्षं सर्वत्यागः कृतो मया ।

तथापि तात विश्रान्तिं नाधिगच्छाम्यनिन्दिताम् ।।

श्रीवसिष्ठ उवाच ।

एवमार्तवचस्तस्मिन्कचे वदति कानने ।

सर्वमेव त्यजेत्युक्त्वा वाक्पतिर्दिवमुद्ययौ ।। १३

गते तस्मिन्कचो देहाद्वल्कलाद्यप्यथात्यजत् ।

गतेन्द्वभ्रार्कतारेण शरद्व्योम्ना समोऽभवत् ।। १६

पुनर्वर्षत्रयेणैष कस्मिंश्चित्काननान्तरे ।

तत्याजाम्बुदवर्षादि शरदीव नभस्तलम् ।। १७

उपासैको दिगन्तेषु शान्तशून्यवपुः श्वसन् ।

दूयमानमनाः प्राप तमेव पितरं गुरुम् ।। १८

कृतपूजाक्रमो भक्त्या समालिङ्गितपुत्रकम् ।

अपृच्छत्स कचो भूयः खेदगद्गदया गिरा ।। १९

कच उवाच ।

तात सर्वं परित्यक्तं कन्थां वेणुलताद्यपि ।

तथापि नास्ति विश्रान्तिः स्वपदे किं करोम्यहम् ।।२०

बृहस्पतिरुवाच ।

चित्तं सर्वमिति प्राहुस्तत्त्यक्त्वा पुत्र राजसे ।

चित्तत्यागं विदुः सर्वत्यागं सर्वविदो जनाः ।। २१

श्रीवसिष्ठ उवाच ।

इत्युक्त्वा वाक्पतिः पुत्रं पुप्लुवे तरसा नभः ।

अन्वियेष कचश्चित्तं परित्यक्तुमखिन्नधीः ।। २२

चिन्तयन्नप्यसौ चित्तं न यदा वेद कानने ।

तदा संचिन्तयामास धियैव पितरं ययौ ।। २३

पदार्थवृन्दं देहादि न चित्तमिति कथ्यते ।

तदेतत्किं क्व वा व्यर्थं निरागस्कं त्यजाम्यहम् ।। २४

पितुः सकाशं गच्छामि ज्ञातुं चित्तं महारिपुम् ।

ज्ञात्वा तत्संत्यजाम्याशु ततस्तिष्ठामि विज्वरः ।।२५

श्रीवसिष्ठ उवाच ।

इति संचिन्त्य स कच उज्जगाम त्रिविष्टपम् ।

वाक्पतिं प्राप्य सस्नेहं ववन्दे प्रणनाम च ।। २६

अपृच्छच्चैनमेकान्ते किं चित्तं भगवन्वद ।

स्वरूपं ब्रूहि चित्तस्य येन तत्संत्यजाम्यहम् ।। २७

बृहस्पतिरुवाच ।

चित्तं निजमहंकारं विदुश्चित्तविदो जनाः ।

अन्तर्योऽयमहंभावो जन्तोस्तच्चित्तमुच्यते ।। २८

कच उवाच ।

त्रयस्त्रिंशन्महाकोटिप्रमाणस्य महामते ।

गुरो गीर्वाणवृन्दस्य कथमेतद्वदेति मे ।। २९

मन्येऽस्य दुष्करस्त्यागो न सिद्धिमुपगच्छति ।

कथमेष किल त्यक्तुं शक्यते योगिनां वर ।। ३०

बृहस्पतिरुवाच ।

अपि पुष्पावदलनादपि लोचनमीलनात् ।

सुकरोऽहंकृतेस्त्यागो न क्लेशोऽत्र मनागपि ।। ३१

यथैतदेवं तनय तथा श्रृणु वदामि ते ।

अज्ञानमात्रसंसिद्धं वस्तु ज्ञानेन नश्यति ।। ३२

वस्तुतो नास्त्यहंकारः पुत्र मिथ्याभ्रमो यथा ।

असन्सन्निव संपन्नो बालवेतालवत्स्थितः ।। ३३

यथा रज्ज्वां भुजंगत्वं मरावम्बुमतिर्यथा ।

मिथ्यावभासः स्फुरति तथा मिथ्याप्यहंकृतिः ।।३४

असदेव यथा द्वित्वं मोहादिन्दौ विलोक्यते ।

तथा स्फुरत्यहंकारो न सत्यो वाप्यसन्न च ।। ३५

एकमाद्यन्तरहितं चिन्मात्रममलान्तरम् ।

खादप्यतितरामच्छं विद्यते सर्ववेदनम् ।। ३६

सर्वत्र सर्वदा सर्वप्रकाशं सर्वजन्तुषु ।

तदेवैकं कचत्यम्बु विलोलास्वब्धिवीचिषु ।। ३७

अत्र कोऽयमहंभावः कुतो वा कथमुत्थितः ।

क्वाप्सु जातो रजोराशिः क्वानलादुत्थितं जलम् ।।३८

अयं सोऽहमिति व्यर्थं प्रत्ययं त्यज पुत्रक ।

तुच्छं परिमिताकारं दिक्कालविवशीकृतम् ।। ३९

दिक्कालाद्यनवच्छिन्नं स्वच्छं नित्योदितं ततम् ।

सर्वार्थमयमेकार्थचिन्मात्रममलं भवान् ।। ४०

फलकुसुमदलानां सर्वदिक्संस्थितानां

रस इव जगतां त्वं संस्थितः सर्वदैव ।

विमलतरचिदात्मा नित्यमेवास्यनन्तः

क इव कच तवाहंनिश्चयो भावमूर्तेः ।। ४१

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० निर्वाणप्रकरणे पू० कचोपाख्याने कचप्रबोधो नामैकादशोत्तरशततमः सर्गः ।। १११ ।।